कोविदः

अभ्यासः – वर्गः २८

रघुवंशम् २.३५, २.३७

समीचीनम् उत्तरं चिनुत –

१) कुम्भोदरः कः?

(अ) कैलासगौरः वृषः

(आ) अष्टमूर्तिः

(इ) अष्टमूर्तेः किङ्करः

(ई) निकुम्भस्य किङ्करः

२) "कैलासगौरः" कः ?

(अ) कुम्भोदरः

(आ) नन्दी

(इ) शिवः

(ई) हिमालयः

३) एतेषु कः शिवस्य अष्टसु मूर्तिषु नान्तर्भवति?

(अ) पृथिवी

(आ) अग्निः

(इ) सूर्यः

(ई) इन्द्रः

४) "अवेहि" – अत्र कः धातुः?

(अ) अव

(आ) ज्ञा

(इ) इण्

(ई) विद्

५) आरुरुक्षोः – अस्य प्रातिपदिकं किम्?

(अ) अरुरुक्षा

(आ) आरुरुक्ष

(इ) आरुरुक्षु

(ई) आरुरुक्ष्

६) "अथैनमद्रेस्तनया शुशोच" – कं शुशोच?

(अ) स्कन्दम्

(आ) कुम्भोदरम्

(इ) देवदारुम्

(ई) वन्यद्विपम्

७) एतेषु कः द्विपशब्दस्य पर्यायः न?

(अ) गजः

(आ) इभः

(इ) पञ्चास्यः

(ई) द्विरदः

८) "सेनान्यम्" अस्य प्रथमाविभक्तिरूपाणि कानि?

(अ) सेनानी – सेनान्यौ - सेनान्यः

(आ) सेनानीः – सेनानियौ - सेनानियः

(इ) सेनानीः – सेनान्यौ - सेनान्यः

(ई) सेनानी – सेनानौ - सेनानः

९) वन्यद्विपेन अस्य त्वक् उन्मथिता – प्रयोगं परिवर्तयत ।

(अ) वन्यद्विपेन अस्य त्वचम् उन्मथितम्

(आ) वन्यद्विपः अस्य त्वचम् उन्मथितवान्

(इ) वन्यद्विपः एनं त्वचः उन्मथितवान्

(ई) वन्यद्विपम् अस्य त्वक् उन्मथितवती

१०) "सेनान्यमालीढमिवासुरास्त्रैः" – अत्र कः अलङ्कारः?

(अ) उपमा

(आ) अतिशयोक्तिः

(इ) अर्थान्तरन्यासः

(ई) रूपकम्